CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ

इन्द्राक्षीस्तोत्रं

प्रारभ्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ नमदा-
देव्यै नमः ॥ ॐअस्य श्रीइन्द्रा-
क्षीस्तोत्रमंत्रस्य पुरंदर ऋषिः ॥
अनुष्टुप् छंदः॥ इन्द्राक्षी देवता ॥
महालक्ष्मी बीजम् ॥ भुवनेश्वरी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इंद्रा० २ शक्तिः ॥ भवानीति कीलकम् ॥ स्तो० २
मम सर्वाभीष्टसिद्ध्यर्थं श्रीइ-
न्द्राक्षीवरप्रसादसिद्ध्यर्थं जपे
विनियोगः ॥ अथ न्यासः ॥
इन्द्राक्षी अंगुष्ठाभ्यां नमः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महालक्ष्मीःतर्जनीभ्यां नमः ॥
माहेश्वरी मध्यमाभ्यां नमः ॥
अंबुजाक्षीः अनामिकाभ्यां न-
मः ॥ कात्यायनी कनिष्ठिका-
भ्यां नमः ॥ कौमारी करतल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

करपृष्ठाभ्यां नमः ॥ एवं हृद- स्तो०
यादिः ॥ इंद्राक्षी हृदयाय नमः ॥
महालक्ष्मीः शिरसे स्वाहा ॥
माहेश्वरी शिखायै वषट् ॥ अंबु- ३
जाक्षीः कवचाय हुम् ॥ कात्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यनी नेत्रत्रयाय वौषट् ॥ कौ-
मारी अस्त्राय फट् ॥ ॐ ह्रां हृद-
याय नमः ॥ ॐ ह्रीं शिरसे स्वा-
हा ॥ ॐहूं शिखायै वषट् ॥ ॐ ह्रैं
कवचाय हुम् ॥ ॐ ह्रौं नेत्रत्र-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

याय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ अथ दिग्बंधः ॥ प्राच्यै दिशे नमः ॥ इंद्राय नमः ॥ आग्नेय्यै दिशे नमः ॥ अग्नये नमः ॥ याम्यायै दिशे नमः ॥ यमाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमः॥ नैर्ऋत्यै दिशे नमः॥ नैर्ऋ-
त्याय नमः ॥ प्रतीच्यै दिशे
नमः॥ वरुणाय नमः॥ वायव्यै
दिशे नमः॥ वायवे नमः॥ उदी-
च्यै दिशे नमः॥ कुबेराय नमः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशान्यै दिशे नमः ॥ ईश्वराय नमः ॥ ऊर्ध्वायै दिशे नमः ॥ ब्रह्मणे नमः ॥ अधरायै दिशे नमः ॥ अनन्ताय नमः ॥ ॐ भूः ॐ भुवः ॐ स्वरोमिति दिग्बंध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नम ॥ अथ ध्यानम् ॥ इन्द्राक्षीं
द्विभुजां देवीं पीतवस्त्रद्वयान्वि-
ताम् ॥ वामहस्ते वज्रधरां दक्षि-
णेन वरप्रदाम् ॥ १ ॥ इन्द्राक्षीं
सहस्रयुवतीनानालङ्कारभूषि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताम्॥ प्रसन्नवदनांभोजामप्स-
रोगणसेवितामू ॥ २ ॥ अथ
मंत्रः॥ ॐऐं ह्रीं श्रीं ह्रीं इंद्राक्षी
ह्रीं श्रीं ह्रीं ऐं ॐ स्वाहा॥(अष्टो-
त्तरशतं जप्त्वा सर्वसिद्धिप्रदाय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कम्॥)इन्द्र उवाच ॥ इन्द्राक्षी
नाम सा देवी दैवतैः समुदाहृता
॥ गौरी शाकंभरी देवी दुर्गानाम्नीति विश्रुता ॥ १ ॥ कात्यायनी महादेवी चन्द्रघंटा महा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तपा ॥ सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥ २ ॥ नारायणी भद्रकाली रुद्राणी कृष्णपिंगला ॥ अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ३ ॥ मेघश्यामा सहस्राक्षी
विकटांगी जलोदरी ॥ महोदरी
मुक्तकेशी घोररूपा महाबला
॥ ४ ॥ अद्रिजा भद्रजा नंदा रोग-
हंत्री शिवप्रिया ॥ शिवदूती क-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राली च प्रत्यक्षपरमेश्वरी ॥ ५ ॥ इंद्राणी इन्द्ररूपा च इन्द्रशक्ति-परायणा ॥ सदासंमोहिनी देवी सुन्दरी भुवनेश्वरी ॥ ६ ॥ एका-क्षरी परब्रह्मस्थूलसूक्ष्मप्रव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्द्धिनी ॥ वाराही नारसिंही च
भीमा भैरवनादिनी ॥७॥ श्रुतिः
स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः
सरस्वती ॥ अनंता विजया पू-
र्णामानस्तोकापराजिता ॥ ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवानी पार्वती दुर्गा हैमवत्यं-
बिका शिवा ॥ शिवा भवानी
रुद्राणी शंकरार्द्धशरीरिणी॥ ९॥
एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण
धीमता ॥ आयुरारोग्यमैश्वर्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानवित्तयशोबलम्॥१०॥श-
तमावर्त्तयद्यस्तु मुच्यते व्या-
धिबंधनात् ॥ आवर्तन सहस्रं
तु लभते वांछितं फलम्॥११॥
राजानं च समाप्नोति इन्द्राक्षीं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इंद्रा० नात्र संशयः ॥ नाभिमात्रे जले स्तो०
१० स्थित्वा सहस्रपरिसंख्यया
॥ १२ ॥ जपेत्स्तोत्रमिदं मंत्रं
वाचासिद्धिर्भवेद्ध्रुवम् ॥ सायं- १०
प्रातःपठेन्नित्यं षण्मासैःसिद्धि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रुच्यते ॥ १३ ॥ संवत्सरमुपा-
श्रित्य सर्वकामार्थसिद्धये ॥
अनेन विधिना भक्तो मंत्र-
सिद्धिः प्रजायते ॥ १४ ॥ संतुष्टा
च भवेद्देवी प्रत्यक्षं संप्रजायते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टम्यां च चतुर्दश्यामिदं स्तोत्रं पठेन्नरः ॥ १५ ॥ धावत-
स्तस्य नश्यंति विघ्नसंख्या नसंशयः ॥ कारागृहे यदा बद्धो
मध्यरात्रेस्तदा जपेत् ॥ १६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिवसत्रयमात्रेण मुच्यते नात्र
संशयः ॥ सकामो जपते स्तोत्रं
मंत्रपूजाविचारतः ॥ १७ ॥
पंचाधिकैर्दशादित्यैरियं सिद्धि-
स्तु जायते ॥ रक्तपुष्पै रक्तवस्त्रै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रक्तचंदनचर्चितैः ॥ १८ ॥ धूप-
दीपैश्च नैवेद्यैः प्रसन्ना भगवती
भवेत् ॥ एवं संपूज्य इन्द्राक्षीं
इन्द्रेण परमात्मना ॥ १९ ॥
वरं लब्ध्वादितेः पुत्रान् भग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वत्याः प्रसादतः ॥ २० ॥ हरिः
ॐ तत्सत् ॥

इति श्रीइन्द्रोक्तं इन्द्राक्षी-
स्तोत्रं संपूर्णम् ॥ शुभमस्तु ॥

पुस्तक मिळनेका ठिकाना—गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेंकटेश्वर " छापाखाना—कल्याण—मुंबई.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाहिरात.

स्तोत्रपाठग्रन्थाः ।

७१५	श्रीरामरक्षास्तोत्र–श्रीराममहिम्नस्तोत्र–विष्णुपञ्जरस्तोत्र–श्रीवेंकटेशाष्टकस्तोत्रेति स्तोत्रचतुष्टयम्	क	०–३	०–॥
७१६	श्रीरामबाराखडी और राममंगल	डा	०–१	०–॥
७१७	नारायणकवच भाषाटीका	क	०–२	०–॥
७१८	श्रीरामसन्मङ्गलस्तोत्र	क	०–१	०–॥
७१९	श्रीबदरीनारायणस्तोत्र शालग्रामस्तुतिः हारकानायकस्तुतिश्च	क	०–३	०–॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७२०	श्रीवेंकटेशक्षमात्रयात्रिंशच्छ्लोकी भाषाटीका.		क	०–१०	०–॥
७२१	श्रीकृष्णाष्टक सटीक		क	०–१	०–॥
७२२	अष्टादशश्लोकीगीता भाषाटीका		क	०–१	०–॥
७२३	अजबकुंज विहारी अष्टक भा० टी०		क	०–२	०–॥
७२४	अन्नपूर्णास्तोत्र भा०टी०		क	०–१	०–॥
७२५	आदित्यहृदय बडा		क	०–४	०–॥
७२६	आदित्यहृदय छोटा अक्षर		क	०–१॥	०–॥
७२७	आदित्यहृदय भाषाटीका....		क	०–४	०–॥
७२८	आदित्यव्रतकथा भाषाटीका		क	०–१	०–॥
७२९	आपदुद्धारक स्तोत्रसमुदाय		क	०–३	०–॥
७३०	इंद्राक्षीस्तोत्र		क	०–१	०–॥
७३१	उपमन्युकृत शिवस्तोत्र भा० टी०		क	०–१	०–॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाहि-

२

७३२ कमलनेत्रस्तोत्र	क	०–१	०–॥	राम.
७३३ कलिसंतारणोपनिषत् भाषाटीका	क	०–४	०–॥	
७३४ कलिमाहात्म्य संस्कृतटीका और भा०टी०क		०–२	०–॥	
७३५ कलिसंतारणोपनिषत् मूल	क	०–१	०–॥	
७३६ कालिकासहस्रनाम	क	०–४	०–॥	
७३७ कालीकवच भा०टी०	क	०–१	०–॥	
७३८ कुशापमार्जन स्तोत्र	क	०–१	०–॥	
७३९ केशवस्तव भाषाटीका	क	०–२	०–॥	
७४० कृपायत्नकृष्णकारुण्याष्टक भाषाटीका	क	०–१	०–॥	
७४१ गङ्गालहरी मूल	क	०–१॥	०–॥	२
७४२ गंगालहरी सान्वय भाषाटीका	क	०–४	०–॥	
७४३ गणेशसहस्रनामावली	क	०–२	०–॥	

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७४४	गङ्गास्थितिनिर्णय भाषाटीका	क	०–२	०–॥
७४५	गणपतिस्तोत्र तथा सरस्वतीस्तोत्र....	क	०–१	०–॥
७४६	गणेशाष्टकस्तोत्र, गंगाष्टकस्तोत्रसहित	क	०–१	०–॥
७४७	गंगासहस्रनाम मोटे अक्षरका	क	०–३	०–॥
७४८	गंगाष्टक	क	०–॥	०–॥
७४९	गायत्रीपटल लघु	क	०–१॥	०–॥
७५०	गायत्रीपुरश्चरण	क	०–२	०–॥
७५१	गायत्रीपञ्चाङ्ग	क	०–१२	०–२
७५२	गोपालसहस्रनामावली	क	०–२	०–॥
७५३	गोपालसहस्रनाम भाषाटीका	क	०–७	०–१
७५४	गोविंदनामगीता	क	०–८	०–१
७५५	गोपालपटल	डा	०–३	०–॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाहि- ३

७५६	गोपालसहस्रनाम राधास्तोत्र स छोटाअक्षर	क	०-२	०-॥
७५७	गोपालसहस्रनाम बडा अक्षर खुला	क	०-३	०-॥
७५८	गोपालसहस्रनाम गुटका रेशमी	क	०-५	०-॥
७५९	चतुःश्लोकीभागवत और सप्तश्लोकीगीता	क	०-॥	०-॥
७६०	चण्डिकास्तोत्र	खे	०-१॥	०-॥
७६१	चर्पटपञ्जरी मूल	क	०-॥	०-॥
७६२	चर्पटपञ्जरी भाषाटीका	क	०-१	०-॥
७६३	चोवीसगायत्री	डा	०-४	०-॥
७६४	जगन्नाथाष्टक	क	०-॥	०-॥
७६५	ज्वरस्तोत्र भा० टी०	क	०-॥	०-॥
७६६	तुलसीकवच	ख	०-२	०-॥

रात्र. ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७६७	तुलसीसहस्रनाम		मुं	०–१॥	०–॥
७६८	दत्तकारुण्यलहरी संस्कृत		क	०–१	०–॥
७६९	दत्तकारुण्यलहरी भाषाटीका		क	०–२	०–॥
७७०	दारिद्र्यमोचनाष्टक		क	०–१	०–॥
७७१	दुर्गासप्तटीका		खे	३–०	०–६
७७२	दुर्गासप्तशती शान्तनवीटीकासहित		क	१–४	०–२
७७३	दुर्गासप्तशती भाषाटीका शान्तनवी टीकाके अनुकूल		क	१–०	०–२

पुस्तक मिलनेका ठिकाना–गंगाविष्णु श्रीकृष्णदास,

' लक्ष्मीवेङ्कटेश्वर ' छापाखाना, कल्याण–मुंबई.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति

इन्द्राक्षीस्तोत्रं

समाप्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri